गुण्डकः, पुं, (गुण्ड+संज्ञायां कन् । गुड़ि+ण्वुल् वा ।) मलिनः । धूली । कलोक्तिः । स्नेहपात्रम् । इति मेदिनी । के । ८३ ॥

गुण्डकन्दः, पुं, (गुण्ड इत्याख्यया प्रसिद्धः कन्दः । गुण्डाणां कन्द इति केचित् ।) कशेरु । इति राजनिर्घण्टः ॥

गुण्डारोचनिका, स्त्री, (गुण्डाऽपि रोचना हरिद्रा इव । तत इवार्थे कन् टाप् कापि अत इत्वञ्च ।) वृक्षविशेषः । कमलागुँड़ि इति भाषा । तत्पर्य्यायः । काम्पिल्लकः २ रक्ताङ्गः ३ । इति रत्नमाला ॥

गुण्डाला, स्त्री, (गुण्डाल+टाप् । यद्वा गुण्डां चूर्णं आलाति आदत्ते इति । आ+ला+कः । स्त्रियां टाप् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । जलोद्भूता २ गुच्छवधा ३ जलाश्रया ४ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । शोथव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

गुण्डासिनी, स्त्री, (गुण्ड इत्याख्यया आस्ते वर्त्तते इति । आस्+णिनिः । गुण्डा सती आस्ते इत्येके ।) तृणभेदः । तत्पर्य्यायः । गुण्डाला २ गुड़ाला ३ गुच्छमूलिका ४ चिपिटा ५ तृणपत्री ६ यवासा ७ पृथुला ८ विष्टरा ९ । अस्या गुणाः । कटुत्वम् । पित्तदाहश्रमश्वयथुव्रणदोषनाशित्वम् । तिक्तत्वम् । उष्णत्वञ्च । इति राजनिर्घण्टः ॥

गुण्डिकः, पुं, स्त्री, (गुण्डोऽस्त्यस्येति । "अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) गुण्डकः । तण्डुलादिचूर्णम् । गुँड़ा इति भाषा । यदुक्तं अनन्तव्रतकथायाम् ।

"गुण्डिकैः सितपीतैश्च मण्डयन्ती गृहाङ्गनम् ॥"

गुण्डिचा, स्त्री, (गुण्डिभिर्गुण्डिकैः सितपीतादिरङ्गैः प्रस्तरेष्टकादिचूर्णैर्वा चीयते उपचीयते इति । चि+घञर्थे कः ततष्टाप् । गुण्डिचा इत्याख्यया प्रसिद्धा वा । यद्वा गुण्ड्यते अवगुण्ठ्यते ब्रह्मतेजोभिरस्या दर्शक इति शेषः । गुड़ि वेष्टने इति धातोर्निपातनात् चकारागमे साधुः । इयं व्युत्पत्तिस्तु गुण्डिचाविवरणदर्शनैरेवबोध्या ।) श्रीपुरुषोत्तमदेवस्य रथारोहणानन्तरवासार्थमण्डपविशेषः । यथा,—

"मण्डपे वासयेद्देवान् गुण्डिचाख्ये मनोहरे ।
चारुचन्द्रातपे चारुमाल्यचामरभूषिते ॥
रत्नस्तम्भमये स्वर्णवेदिकोपस्तृतान्तरे ।
नीरवलयावीते सुधालेपसमुज्ज्वले ॥
माधुसोपानघटिते चतुर्द्वारोपशोभिते ।
त्रैलोक्याड़म्बरयुते महावेद्यां महाकृतेः ॥
प्रादुर्भावो महेशस्य यात्राभूद्दारुवर्ष्मणः ॥ *॥
तस्यां श्रीजगन्नाथदेवस्य दर्शनफलं यथा,—
"बिन्दुतीर्थतटे तस्मिन् सप्ताहानि जनार्द्दनः ।
तिष्ठेत् पुरा स्वयं राज्ञे वरमेतत् समादिशत् ॥
तत्तीर्थतीरे राजेन्द्र ! स्थास्यामि प्रतिवासरम् ।
सर्व्वतीर्थानि तस्मिंश्च स्थास्यन्ति मयि तिष्ठति ॥
तत्र स्नात्वा विधानेन तीर्थे तीर्थोपपावने ।
सप्ताहं ये प्रपश्यन्ति गुण्डिचामण्डपे स्थितम् ॥
मां च रामं सुभद्राञ्च मम सायुज्यमाप्नुयुः ॥" *॥

तस्या नामकरणं यथा, उत्कलखण्डम् ।

"अत ऊर्द्ध्वं प्रवक्ष्यामि महावेदीमहोत्सवम् ।
अज्ञानतिमिरान्धोऽपि येन भास्वत्पदं भजेत् ॥
सर्व्वपापहरणःश्रान्त्या पूज्यत्वात् सर्व्वदैवतैः ।
गुण्डिचाख्यापि सा यात्रा ब्रह्मतेजोऽवगुण्ठनात् ॥"

गुण्डितः, त्रि, (गुड़ि वेष्टने+कर्म्मणि क्तः ।) धूलिगुण्डकेनेव ध्वंसितः । तत्पर्य्यायः । रूषितः २ । इत्यमरः । ३ । १ । ८९ ॥ चूर्णीकृतञ्च ॥

गुत्थः, पुं, (गुत्स+पृषोदरादित्वात साधुः ।) गवेधुका । इति रत्नमाला ॥

गुत्थकं, क्ली, (गुत्थ+संज्ञायां कन् । यद्वा गुच्छ इव गुच्छेन वा कायतीति । कै+कः । पृषोदरात् साधुः ।) ग्रन्थिपर्णम् । इति रत्नमाला ॥

गुत्सः, पुं, (गुध्यते तृणपत्रपुष्पादिभिः परिवेष्ट्यतेऽसौ इति । गुध् परिवेष्टने+"उन्दिगुधिकुषिभ्यश्च ।" उणां । ३ । ६८ । इति कर्म्मणि सः किच्च ।) स्तवकः । स्तम्भः । (हारादौ तु गुध्यते परिवेष्ट्यते कण्ठवक्षःस्थलादिकमनेन ।) द्वात्रिंशद्यष्टिकहारः । ग्रन्थिपर्णवृक्षः । इति मेदिनी । से । २ ॥

गुत्सकः, पुं, (गुत्स+स्वार्थे कन् ।) स्तवकः । इति शब्दरत्नावली ॥ ग्रन्थपरिच्छेदः । इति त्रिकाण्डशेषः ॥

गुत्सकपुष्पः, पुं, (गुत्सकानि स्तवकीभूतानि पुष्पाणि यस्य यत्र वा ।) सप्तच्छदवृक्षः । इति जटाधरः ॥

गुत्सार्द्धः, पुं, (गुत्सं गुच्छं प्राप्य आश्रित्य वा ऋध्नोतीति । ऋध्+अच् । गुत्सं आर्द्धयति वर्द्धयति इति । ऋध्+णिच् अच् वा । यद्वा गुत्सस्य अर्द्धः अंसमांशकः ।) गुच्छार्द्धः । चतुर्व्विंशतियष्टिकहारः । इत्यमरटीकायां भरतः ॥

गुद, ङ खेलने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) ङ, गोदते । इति दुर्गादासः ॥

गुदं, क्ली, (गोदते खेलति चलतीत्यर्थः अपानसंज्ञकवायुः अनेन । गुद्+"इगुपधेति ।" ३।१।१३५ । इति कः ।) मलत्यागद्वारम् । तत्पर्य्यायः । अपानम् २ पायुः ३ । इत्यमरः । २ । ६ । ७३ ॥ गुह्यम् ४ गुदवर्त्म ५ । इति जटाधरः ॥ (यथा, मनौ । ८ । २८२ ।

"अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवशर्द्धयतो गुदम् ॥")

गुदकीलः, पुं, (गुदस्य अपानस्य मलद्वारस्येत्यर्थः यद्वा गुदे कील इव ।) अर्शोरोगः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"आनाहमेदो गुदकीलहिक्का-
श्वासापहः शोणितपित्तकृच्च ॥")

गुदकीलकः, पुं, (गुदकील+स्वार्थे कन् ।) गुदकीलः । इति हलायुधः ॥

गुदग्रहः, पुं, (गुदस्य ग्रह इव गुदमाश्रित्य ग्रहवत् प्रवर्त्तते इत्यर्थः । यद्वा गुदं मलद्वारमधिकृत्य आभ्यन्तरिकस्थानं गृह्णाति धारयतीति ग्रह+अच् ।) उदावर्त्तरोगः । इति हेमचन्द्रः । ३ । १३३ ॥

गुदभ्रंशः, पुं, (गुदस्य भ्रंशोऽस्मात् । गुदं भगं भ्रंशतेऽस्मादिति वा ।) मलद्वारनिर्गमरोगः । तस्य लक्षणम् ।

"प्रवाहणातिसाराभ्यां निर्गच्छति गुदं वहिः ।
रूक्षदुर्ब्बलदेहस्य गुदभ्रंशं तमादिशेत् ॥"
इति माधवकरः ॥

तच्चिकित्सा यथा,—

"गुदभ्रंशे गुदं स्विन्नं स्नेहेनाक्तं प्रवेशयेत् ।
प्रविष्टं रोधयेद्यत्नाद्गयसच्छिद्रचर्म्मणा ॥
पद्मिन्याः कोमलं पत्रं यः खादेच्छर्करान्वितम् ।
एतन्निश्चित्य निर्द्दिष्टं न तस्य गुदनिर्गमः ॥
मूषकाणां वसाभिर्व्वा गुदभ्रंशे प्रलेपनम् ।
सुस्विन्नमूषिकामांसेनाथवा स्वेदयेद्गुदम् ॥
वृक्षाम्लानलचाङ्गेरीविल्वपाठायवाग्रजम् ।
तक्रेण शीलयेत् पायुं भ्रंशार्त्तोऽनलदीपनम् ॥
मूषकान् दशमूलानि गृहीयादुभयं समम् ।
तयोः क्वाथेन कल्केन पचेत्तैलं यथोदितम् ॥
अभ्यङ्गात्तस्य तैलस्य गुदभ्रंशो विनश्यति ।
विनश्यति तथा तेन गुदमूलं भगन्दरः ॥"
इति मूषकतैलम् । इति भावप्रकाशः ॥

(यदा गुह्यं निरस्येत तदा कुर्य्यात् क्रियामिमाम् ।
सहचर्य्याबलानाञ्च रसो ग्राह्यो घृतं पयः ॥
पक्वा घृतेन लेपः स्यात् तस्य चेदं प्रशस्यते ।
अरणीपल्लवक्वाथो वाप्यं लोष्ट्रं सचन्दनम् ॥
प्रोत्तप्य वह्निसदृशं सहसा नरस्य
निर्व्वाप्य काञ्जिकमथो विदधीत तद्वत् ।
सौख्यञ्च साम्यगुदसेचनकं प्रशस्तं
संवेशमध्यगुदतो दृढ़बन्धनं स्यात् ॥"
इति गुदभ्रंशः ॥
इति हारीते चिकित्सितस्थाने तृतीयेऽध्याये ॥*॥

अथास्य चिकित्सा ।

"गुदनिःसरणे शूले पानमम्लस्य सर्पिषः ।
प्रशस्यते निरामाणा मथवाप्यनुवासनम् ॥
चाङ्गेरी कोलदध्यम्लनागरक्षारसंयुतम् ।
घृतमुत्क्वथितं पेयं गुदभ्रंशरुजापहम् ॥"
इति चाङ्गेरीघृतम् ॥ * ॥
"सत्तव्यपिप्पलीमूलं सयोषविड़दाड़िमम् ।
पेयमम्लं घृतं युक्त्या सधान्याजाजिचित्रकम् ॥
दशमूलोपसिद्धं वा सविल्वमनुवासनम् ।
शताङ्का शटी विल्वैर्व्वा वचया चित्रकेण वा ॥
स्तब्धभ्रष्टगुदं पूर्व्वं स्नेहस्वेदौ प्रयोजयेत् ॥"
इति चरके चिकित्सास्थाने दशमेऽध्याये ॥)

गुदाङ्कुरः, पुं, (गुदे अङ्कुरः प्ररोह इव गुदमधिकृत्य प्ररोहवदुत्पद्यते वलिरित्यर्थः ।) अर्शोरोगः । इति हेमचन्द्रः ॥ ३ । १३२ ।
("गुदाङ्कुरा बहुनिलाः ।" इति वाभटे निदानस्थाने सप्तमेऽध्याये ॥)